# 3 - तृतीय दशकम्
# उत्तम भक्तस्य गुणाः

पठन्तो नामानि प्रमद भर सिन्धौ निपतिताः
स्मरन्तो रूपं ते वरद कथयन्तो गुण कथाः ।
चरन्तो ये भक्ताः त्वयि खलु रमन्ते परममून्
अहं धन्यान् मन्ये समधिगत सर्वा भिलषितान् ॥ ॥3-1॥

गदक्लिष्टं कष्टं तव चरण सेवा रस भरेपि
अनासक्तं चित्तं भवति बत विष्णो कुरु दयाम् ।
भवत् पादाम्भोज स्मरण रसिको नाम निवहान्
अहं गायं गायं कुहचन विवत्स्यामि विजने ॥ ॥3-2॥

कृपा ते जाता चेत् किमिव न हि लभ्यं तनु भृतां
मदीय क्लेशौघ प्रशमन दशा नाम कियती ।
न के के लोकेऽस्मिन् अनिशमयि शोकाभि रहिता
भवद्भक्ता मुक्ताः सुख गति मसक्ता विदधते ॥ ॥3-3॥

मुनि प्रौढा रूढा जगति खलु गूढात्म गतयः
भवत् पादाम्भोज स्मरण विरुजो नारद मुखाः ।
चरन्तीश स्वैरं सतत परिनिर्भात परचित्
सदानन्दा द्वैत प्रसर परिमग्नाः किम परम् ॥ ॥3-4॥

भवत् भक्तिस् स्फीता भवतु मम सैव प्रशमयेत्
अशेष क्लेशौघं न खलु हृदि सन्देह कणिका ।
न चेत् व्यासस् योक्तिः तव च वचनं नैगम वचः
भवेन् मिथ्या रथ्या पुरुष वचन प्राय मखिलम् ॥ ॥3-5॥

भवत् भक्तिस् तावत् प्रमुख मधुरा त्वत् गुण रसात्
किमप्या रूढा चेत् अखिल परिताप प्रशमनी ।
पुनश्चान्ते स्वान्ते विमल परिबोधोदय मिलत्
महानन्दा द्वैतं दिशति किमत: प्रार्थ्य मपरम् ॥ ॥3-6॥

विधूय क्लेशान्मे कुरु चरण युग्मं धृत रसं
भवत् क्षेत्र प्राप्तौ कर मपि च ते पूजन विधौ ।
भवन् मूर्त्या लोके नयन मथ ते पाद तुलसी
परिघ्राणे घ्राणं श्रवण मपि ते चारु चरिते ॥ ॥3-7॥

प्रभूताधि व्याधि प्रसभ चलिते मामक हृदि
त्वदीयं तद्रूपं परम सुख चिद्रूप मुदियात् ।
उदञ्चद् रोमाञ्च: गलित बहु हर्षाश्रु निवह:
यथा विस्मर्यासं दुरुपशम पीडा परिभवान् ॥ ॥3-8॥

मरुद् गेहाधीश त्वयि खलु पराञ्चोऽपि सुखिन:
भवत् स्नेही सोऽहं सुबहु परितप्ये च किमिदम् ।
अकीर्तिस्ते मा भूत् वरद गद भारं प्रशमयन्
भवत् भक्तोत् तंसं झटिति कुरु मां कंस दमन ॥ ॥3-9॥

किमुक्तैर् भूयोभि: तव हि करुणा याव दुदियात्
अहं तावत् देव प्रहित विविधार्त प्रलपितः ।
पुर: क्लृप्ते पादे वरद तव नेष्यामि दिवसान्
यथा शक्ति व्यक्तं नति नुति निषेवा विरचयन् ॥ ॥3-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥